CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगणेशाय नमः॥ नंदिकेश्वर उवाच॥ ॥अतः परमिदं गुह्यं सूत्रोक्तं म
हेदयम्॥ महाविघ्नप्रशमनं महाशांतिकरं परम्॥१॥ अकालमृत्युशमनं
सर्वव्याधिनिवारणम्॥ परचक्रप्रमथनं सदाविजयवर्द्धनम्॥२॥ सर्वदेवग
हानीकं ममभीष्टफलप्रदम्॥ सर्वशांत्यधिकारख्यं धर्म्मं वक्ष्यामि शाश्व
तम्॥३॥ शशांकार्द्धधरस्स्रग्वी नागयज्ञोपवीतकः॥ चतुर्भुजश्चतुर्बाहुः
सितभस्मावगुंठितः॥४॥ वरो वरेण्यो वरदो देवदेवो महेश्वरः॥ त्रैलोक्य
नमितः श्रीमान् शांतिमाप्नुकरोतु मे॥५॥ सर्वावयवपूर्णेन गात्रेणानंत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मध्यमाः॥ पीतश्यामानिसौम्येनन्दिश्वरोनिशोभना॥६॥ ललाटेति
लकोपेताचंद्ररेखार्द्धधारिणी॥ चित्रांबरधरादेवीसर्वाभरणभूषिता॥७
॥ वरस्त्रीमयरूपेणशोभागुणमहास्पदा॥ भावनामात्रसन्तुष्टाउमादे
वीवरप्रदा॥८॥ साक्षाद्गत्यरूपेणशान्तेनामिततेजसा॥ शांतिकरोतु
मेप्रीताभक्तानांभक्तवत्सला॥९॥ पद्मरागः द्युतिः सौम्योरक्तमाल्यानु
लेपन॥ अबालोबालरूपेणषड्वक्तः शिखिवाहन॥१०॥ हुर्गोंडवदनः
सौम्यश्चिद्विभावः शक्तिसंयुत॥ कृत्तिकोमाग्निरुद्राख्यसम्भूतः सुरार्चि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ शां० या ॥
॥ ४ ॥

तः ॥ ११ ॥ कार्त्तिकेयो महातेजा वरदानैकतत्परः । शांतिं करोतु मे नित्यं ब
लं सौख्यं च सर्वदा ॥ १२ ॥ श्वेतवस्त्रपरीधानस्त्र्यक्षः कनकसुप्रभः । म
ऽभक्तो महायोगी नन्दिको हितमानसः ॥ १३ ॥ शूलपाणिर्महाशान्तो
नन्दीशः शिवभावितः । शिवार्चनपरो नित्यं शिवध्यानैकतत्परः ॥ १४ ॥
शांतिं करोतु मे शान्तो धर्मे च मतिमुत्तमाम् ॥ महोदरो महाकायः वि
घ्नांजनचयच्छवि ॥ १५ ॥ एकदंष्ट्रोत्कटो देवो गजवक्त्रो महाबलः ।
नागयज्ञोपवीती च नागाभरणभूषितः ॥ १६ ॥ सर्वार्थसम्पदाधारो

॥ ग० म ॥
॥ ४ ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३ पापप्रनोदमतुलं मलक्षितिमलनाशनं ॥१९॥ कटु ... ...
लो ... ...रितिः ॥

गणाध्यक्षोवरप्रदः॥ रुद्रस्यतनयोदेवोनायकोथविनायकः॥१७॥ करो
तुमेमहाशान्तिंकर्मसिद्धिंचविंदति॥ इंद्रनीलनिभश्यामोरोप्रथलाण्डवे
घनः॥१८॥ क्रौंचवरधरः श्रीमान्कृत्वाक्षोनागभूषणः॥ करोतुमेमहा
शान्तिमहाकालोमहाबलः॥ ... ...
... ॥२०॥ गणमातांबिकाप्रसाशांतागौरीसुरेश्वरी॥ सर्वसिद्धिकरी
देवीप्रसादपरमापरा॥२१॥ शांतिंकरोतुमेमातासिद्धिंचानुप्रयछतु॥
स्निग्धश्यामेनवर्णेनमहामहिषमर्दिनी॥२२॥ धनुश्चकप्रहरणाख

Jayatu Sanskritam, Kathmandu, Nepal

॥सा॰य॥ रूपहिंशाधारिणी॥ आन्तर्ज्जन्मघनकरासर्व्वोपद्रवनाशिनी॥ २३॥ सर्व
॥३॥ मङ्गलमाता मे शिवभावरतुर्ध्रुवम्॥ निर्म्मलेन शरीरेणास्तु स्थितिरुनि
र्वंधन॥ २४॥ अतिसूक्ष्मोतिविक्रान्तव्याक्षोभृङ्गिरिटिर्महान्॥ महात्मने
महावीरो हठैकाहितमानस॥ २५॥ सोपि मे शान्तभावेन शान्तिमाप्नु
प्रयछतु॥ षड्वक्त्रगणसेनेशो महाटंकास्त्रधारकः॥ २६॥ अक्षमालापि
नकाश्वस्थ्यश्चगोश्वरो वर॥ चण्डनाथपापहरणो ब्रह्महत्यादिशोधकम् ॥एम॥
॥७॥ करोतु मे महायोगी कल्याणानां परंपराम्॥ शंखकुन्देन्दुतुल्या ॥३॥

CC-0. Digitized by eGangotri and MIDF- Delhi

भाःकरोतुमेकान्तप्रभः ॥२८॥ अक्षमालीशिवाग्रस्थःस्वयंज्ञानव्यवस्थि
तः ॥ चतुर्मुखश्चतुर्व्यास्त्रिनेत्रःसर्वतोज्वलः ॥२९॥ क्षितिपतिर्हृषोद्द
बोधर्मोधर्मतमोत्तमः ॥ ईशंवहतिपृष्ठेनतस्माद्धर्मोजगद्गुरुः ॥३०॥ वृ
षोवृषवरःश्रीमान्करोतुममशान्तिकम् ॥ पद्मासनःपद्मनिभश्चतुर्वद
नपंकजः ॥३१॥ कमण्डलुधरःश्रीमान्देवगंधर्वपूजितः ॥ शिवध्यानैक
परमःशिवसद्भावभावितः ॥३२॥ ब्रह्मशब्देनदिव्येनब्रह्माशान्तिंकरोतु
मे ॥ तार्क्ष्यासनश्चतुर्बाहुःशंखचक्रगदाधरः ॥३३॥ श्यामःपीताम्बरध

Jayatu Sanskritam, Kathmandu, Nepal

॥शां य॥
॥४॥

रिमहावलपराक्रमः॥ यन्तदेहोनमोदेवोमाधवोमधुसूदन॥३४॥शि
वप्रसादसम्पन्नः करोतुममशान्तिकम्.ॱवंपापप्रनयकःसर्वार्त्तनिष्कं
निष्कः॥३५॥सर्वदाशान्तभावेनविष्णुःशांतिकरोतुमे अर्हन्तुशांतरूपा
चापिछित्वंधैकपाणिक॥३६॥स्थिवासाक्षतवासाश्चशान्तचित्तःसमा
हितः॥संवर्तलोचनःशांतःशिवत्नैकचित्तकः॥३७॥शान्तिंकरोतुमे
शांतःशिवयोगेनभावितः॥जितेंद्रियःसमाधिस्थःपात्रचीवरभूषि
तः॥३८॥वरदाभयपाणिश्चज्ञानध्यानरतःसदा॥योगदृष्टिःसमाधु

॥रमः॥
॥४॥

ध्या २

CC-0. Digitized by eGangotri and MIDF- Delhi

नाः शिवज्ञानेनभावित ॥ ३९ ॥ शांतिंकरोतुमेवज्रोवज्रकायोमहाकृपः
॥ पीतवर्णेनदेहेनहारेणाभिविचित्रिता ॥ ४० ॥ सर्वाङ्गसुंदरीदेवीवि
जयाजयकांक्षिणी ॥ शिवार्चनरतानित्यंशिवज्ञानपरायणा ॥ ४१
धरित्रीलोकमाताचनित्यंरक्षांकरोतुमे ॥ नंदाभद्राचसुरभीसुशीलासु
मनास्तथा ॥ ४२ ॥ क्षीरोदादुत्थितागावोलोकानांहितकाम्यया ॥ शीरा
पन्तिसदादेवान्विप्रांश्चैवविशेषतः ॥ ४३ ॥ नित्यंचदेवतात्मानःकुर्व
न्तुममशांतिकम् ॥ पद्मरागप्रभादेवीचतुर्वदनपंकजा ॥ ४४ ॥ अस

Jayatu Sanskritam, Kathmandu, Nepal

॥श्या पा॥ मालार्पितकराकमण्डलुधराशुभा॥ ब्रह्माणी सोम्यवदना शिवपूज
॥५॥ परायणा॥८५॥ शांतिंकरोतु मे शीता ब्रह्मशब्देन सर्वदा॥ हिमशैल
निभा देवी महावृषभवाहना॥८६॥ त्रिशूलहस्ता वरदा नानाभरण
भूषिता। चतुर्भुजा चतुर्वक्त्रा त्रिनेत्रा पापहारिणी॥८७॥ आर्तिंहरतु
मे शीता रुद्राणी नित्यमुज्ज्वला॥ मयूरवाहना देवी सिंदूरारुणविग्रहा
॥८८॥ शक्तिहस्ता महारूपा सर्वालंकारभूषिता॥ रुजभक्ता महा ॥श्या म॥
वीर्यारुजार्चनरता सदा॥८९॥ कौमारी वरदा देवी शांतिमाशु ददातु ॥५॥

मे॥ शंखचक्रगदाहस्ता श्यामा पीताम्बरप्रिया॥ ५०॥ चतुर्भुजा तार्क्ष्ये
सा मा वैष्णवी सुरपूजिता॥ शिवार्चनपरा नित्यं शिवैकाहितमानस
॥ ५१॥ शांतिं करोतु मे नित्यं सर्वासुरविमर्द्दिनी॥ ऐरावतगजारूढा
वज्रहस्ता महाबला॥ ५२॥ नेत्राणां तु सहस्रेण भूषिता कनकप्रभा
॥ सिद्धगंधर्वनमिता सर्वालंकारभूषिता॥ ५३॥ ऐंद्रा देवी सदा का
लं शांतिमाशु करोतु मे॥ वाराहघोणा विकटा वराहवरवाहना॥ ५४
श्यामावदाता विपुला शंखचक्रगदायुधा॥ नर्म्मयंती सदा विघ्नानचै

गो

॥सा या॥ यन्तीसदाशिवम्॥५५॥वाराहीवरदादेवीक्षेमारोक्षंददातु मे॥ ऊर्द्ध्वकेशी
॥६॥ कोटराक्षीनिर्मांसास्नायुबन्धना॥५६॥कालवदनाघोराखङ्गकहार
कोद्यता॥कालमालिनीक्रुद्धाखट्वाङ्गवरधारिणी॥५७॥आरक्तपिङ्ग
नयनागजचर्मावगुण्ठिता॥नानानागोपवीताङ्गीप्रेतस्थाननिवासिनी॥५८
॥शिवरूपेणघोरेणशिवारावभयंकरी॥चामुण्डाचंडरूपेणमहार
क्षांकरोतु मे॥५९॥आपातेनशरीरेणनानाभरणभूषिता॥आतर्जयन्ती ॥एम॥
विघ्नानिज्वलत्खड्गांगधारिणी॥६०॥ध्वांक्षासनामहावीरासर्वपापप्रणा ॥६॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षिनी ॥ त्वं वो षोवरदा देवी शान्तिमाशु करोतु मे ॥ ११ ॥ आकाशमातरो दिव्या
स्तथान्या लोकमातरः ॥ भूतानां मातरः सर्वास्तथान्यासुरमातरः ॥ १२ ॥
सर्वमातृमहादेव्यः स्वायुधव्यग्रपाणय ॥ जगद्व्याप्यावतिष्ठं तेवलिका
मामहेश्वरा ॥ १३ ॥ रुद्रभक्तो महावीर्यो रुद्रार्चाहितमानसः ॥ शान्तिं कुर्व
तु मे नित्यं मातरः सुरपूजिता ॥ १४ ॥ ये रुद्रा रौद्रकर्माणो रौद्रस्थाननिवा
सिन ॥ सौम्याश्चैव तु ये केचित्सौम्यस्थाननिवासिन ॥ १५ ॥ मातरो रुद्र
रूपाश्च गणानामधिपाश्च ये ॥ विघ्नभूतास्तथा चान्ये दिग्विदिक्षु समाश्रि

Jayatu Sanskritam, Kathmandu, Nepal

॥ शा या ॥
॥७॥

ता ॥ ६६ ॥ सर्वे सुप्रीतमनसः प्रतिगृह्णंतु ते बलिम् ॥ सिद्धिमाशु प्रयच्छं-
तु भयेभ्यः पातु मां सदा ॥ ६७ ॥ ऐंद्रां दिशि गणा ये तु वज्रहस्ता महाबलाः
सुश्वेताक्षाः श्वेतनिभास्तथा वै श्वेतलोहिताः ॥ ६८ ॥ दिव्यांतरिक्षभौमा-
श्च पातालतलवासिनः ॥ रुद्रार्चनरता हृष्टाः शांतिं कुर्वंतु मे सदा ॥ ६९ ॥
आग्नेय्यां ये गणाः सर्वे स्रुवहस्ता निषंगिणः ॥ आरक्ताक्षा रक्तनिभास्त-
था वै रक्तलोहिता ॥ ७० ॥ दिव्यांतरिक्षभौमाश्च पातालतलवासिनः ॥ ॥ ए मा ॥
रुद्रप्रणाममनसः शांतिं कुर्वंतु मे सदा ॥ ७१ ॥ याम्यां दिशि गणा ये तु सत- ॥७॥

तं दंडपाराय ॥ कृष्णा कृष्णनिभाः कृष्णास्तथावै कृष्णलोहिता ॥ ७२ ॥ दि
व्यांतरिक्षभौमाश्च पातालतलवासिनः ॥ रुद्रैकाहितचेतस्काः शांतिंकु
र्वंतु मे सदा ॥ ७३ ॥ नैर्ऋत्यां तु गणाः क्रूरा राक्षसा मृत्युरूपिणा ॥ उनील
ला नीलनिभास्तथावै नीलनिभास्तथावै नीललोहिता ॥ ७४ ॥ दिव्यांत
रिक्षभौमाश्च पातालतलवासिन ॥ रुद्रैकध्याननिरताः शांतिंकुर्वंतु मे
सदा ॥ ७५ ॥ वारुण्यांवै गणा प्रेतुसततं पाशपाणय ॥ उश्यामाश्याः श्या
मनिभास्तथावै श्यामलोहिता ॥ ७६ ॥ दिव्यांतरिक्षभौमाश्च पातालतलवा

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

॥शां प॥ सिन ॥ परमेशार्चनरताः कुर्वंतु मम शांतिकम् ॥७७॥ वायव्यां वैगणापेतु
॥७॥ सततं ध्वजपाणय ॥ सुपीताक्षाः पीतनिभास्तथा वै पीतलोहिता ॥७८॥ दि
व्यांतरिक्षभौमाश्च पातालनलवासिन ॥ शिवभक्तिपराः सर्वे क्षेमं कुर्व
तु मे सदा ॥७९॥ उत्तरस्यां गणापेतु सततं निधिपाणय ॥ शवलाक्षाः श
वलानिभास्तथा शवललोहिता ॥८०॥ दिव्यांतरिक्षभौमाश्च पातालनल
वासिन ॥ शिवपूजासमुयुक्ताः क्षेमं कुर्वंतु मे सदा ॥८१॥ ऐशान्यां वैग ॥एम॥
णापेतु प्रशांताः शूलपाणय ॥ सूक्ष्माः सुसूक्ष्मसंकाशास्तथा वै सूक्ष्मलो ॥७॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हिता ॥ ८३ ॥ दिव्यांतरिक्षभौमाश्च पातालतलवासिनः ॥ शिवपूजासमु
द्युक्ताः क्षेमं कुर्वंतु मे सदा ॥ ८४ ॥ अधोभागे गणाश्चैव संततं शूलपाणयः
धूम्राधूम्रनिभाः सर्वे तथा वै धूम्रलोहिता ॥ ८५ ॥ दिव्यांतरिक्षभौमाश्च
पातालतलवासिनः ॥ शिवं कुर्वंतु मे नित्यमलक्ष्मीमलनाशनम् ॥ ८६ ॥
उर्ध्वभागे गणाश्चैव महाबलपराक्रमाः ॥ सूक्ष्माः सूक्ष्मनिभास्त
था वै सूक्ष्मलोहिताः ॥ ८७ ॥ दिव्यांतरिक्षभौमाश्च पातालतलवासिनः
॥ शिवपूजासमुद्युक्ताश्चाशुभं नाशयंतु मे ॥ ८८ ॥ एते गणा महात्मानो

Jayatu Sanskritam, Kathmandu, Nepal

॥श्री या॥
॥९॥

महाबलपराक्रमाः॥ शिवसंपूज्ययत्नेन बलिं तेषां विनिःक्षिपेत्॥८८॥
ततः सुप्रीतमनसः शांतिं कुर्वंतु मे सदा॥ अमरावती नाम पुरी पूर्वभागे
व्यवस्थिता॥८९॥ विद्याधरसमाकीर्णा सिद्धगंधर्वसेविता॥ रत्नप्राका
ररुचिरा सर्वरत्नोपशोभिता॥९०॥ तत्र देवपतिः श्रीमान् वज्रपाणिर्म
हाबल॥ देवानां तु सहस्रेण शोभनेन विराजते॥९१॥ ऐरावतगजा
रूढो हेमवर्णो महाद्युति॥ देवेंद्रः सततं हृष्टः परमेशार्च्चने रतः॥९२॥
शिवध्यानेन सम्पन्नः शिवभक्तिसमन्विता॥ शिवप्रणामपरमः क

॥राम॥
॥९॥

CC-0. Digitized by eGangotri and MIDF- Delhi

रोतु मम शांतिकम्॥ ९३॥ आग्नेये दिग्विभागे तु पूरिते जोवती शुभा॥ ना
ना देव समाकीर्णा रत्नज्वाला समुज्वला॥ ९४॥ नत्र ज्वाला परां तां गौरी
त्रां गार समद्युति॥ मूर्तिहदेहिनां देवोज्वलनः पापनाशन॥ ९५॥ शिव,
पूजा जपो द्युतः शिवस्मरणभावित॥ शांतिं करोतु मे देवस्तथा पापप
रिक्षयम्॥ ९६॥ वैवस्वती नाम पूरी दक्षिणेन व्यवस्थिता॥ सुराद्युरग
नानीकपितृरक्षो रगालया॥ ९७॥ तत्रैं द्रनीलसंकाशो रक्तां नाम्यन लोच
नः॥ महामहिषमारूढः कृष्णस्रग्वस्त्रभूषणः॥ ९८॥ अन्तकोथमह

Jayatu Sanskritam, Kathmandu, Nepal

॥ शा या ॥
॥ ११ ॥

तेजाः शिवधर्मपरायणाः ॥ शिवपूजासमुद्युक्तः क्षमारोग्यं ददातु मे ॥ ९९
नैर्ऋत्ये तु दिशोभागे प्रतिष्ठन्ते निविश्रुता ॥ महारक्षोगणाकीर्णा पिशाच
भूतसंकुला ॥ १०० ॥ नवाञ्जीमूतसंकाशो रक्तस्रग्वस्त्रभूषणः ॥ खड्गपा
णिर्महातेजाः करालवदनोज्वलः ॥ १ ॥ रक्षेन्द्रो निर्ऋति नित्यं शिवार्चनर
तः सदा ॥ करोतु मे महाशान्तिं शिवभक्तिसमुत्सुकः ॥ २ ॥ पश्चिमे तु दिशो
भागे प्रशिद्धवती शुभा ॥ नानागणसमाकीर्णा नानाकिंनरशोभिता ॥ ३ ॥ एन ॥
॥ नवमौक्तिकसंकाशः परिपिंगललोचनः ॥ शुक्लवस्त्रपरीधानः पाश ॥ १० ॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हस्तो महाबल ॥ ४ ॥ वरुणः परया भक्त्या शिवैकाहितमानसः ॥ रोगदो
कान्तिसंतापं निर्नाशयतु मे सदा ॥ ५ ॥ वायव्ये दिग्विभागे तु पुरी गंधवती
शुभा ॥ मणिसिद्धगणाकीर्णा हेमप्राकारतोरणा ॥ ६ ॥ तत्रनाम्ना
देहेनक्षत्रपिंगललोचन ॥ परव्याप्तानरालीनोध्वजयस्थापृथोयतः ॥
७ ॥ पवनः परमो देवः परमेश्वरभावितः ॥ क्षेमारोग्यं बलं शान्तिं करोतु सत
तं मम ॥ ८ ॥ महोदयानाम पुरी उत्तरे रम्य महोज्वला ॥ अनेकयक्षसंकीर्ण
नानारत्नोपशोभिता ॥ ९ ॥ तत्र देवो गदाहस्तश्चित्रस्रग्वस्त्रभूषणः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ह्रस्वबाहुर्महातेजाः परिपिंगललोचन ॥१०॥ कुवेरोवरदः श्रीमान् हरपार्श
र्वनेरतः ॥ शांतिंकरोतु मे शांतः प्रीतः प्रीतेन तेजसा ॥११॥ यशोवतीपुरीय
स्याऐशानी दिशमाश्रिता ॥ नानागणसमाकीर्णा नानाऽसुरकृतालयाः
॥१२॥ तेजः प्राकारपर्यन्तानि रौ पम्पा महोदया ॥ नवमौक्तिकसंकाशः
शशांककृतभूषण ॥ १३॥ त्रिनेत्रः शांतरूपात्मा अक्षमालाधरः सदाः
॥ईशानः परमोदेवो सर्वदेवो नमोनम ॥१४॥ सिद्धानां योगिनां चैव स
र्वदेवनमस्कृत ॥ सोपि सर्वात्मभावेन शांतिमाशु प्रयच्छतु ॥१५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूर्लोकेथभुवर्लोकेनिवसंतिये॥देवतादिव्यसंयुक्ताः शांतिंकुर्वंतुमेसदा
१६॥महर्लोकेजनलोकेतपोलोकेस्थिताश्चये॥तेपिप्रमुदितादेवाः शिवं
कुर्वंतुमेसदा॥१७॥सत्यलोकेचयेदेवाः प्रभावोज्वलविग्रहाः॥शिवभक्ता
सुमनसोभयंनिर्नाशयंतुमे॥१८॥गिरिकंदरदुर्गेषुवनेषुनिवसंतिये॥
रुद्रार्चनपरादेवारक्षांकुर्वंतुमेसदा॥१९॥महातलेवसंतिस्मरसातले
षुसंस्थिता॥तलातलेचयेसंतियेसंतिसुतलेजना॥२०॥नितलेसं
स्थिताभूतावितलेनिवसंतिये॥तलेचानिलयायेषांरक्षांकुर्वंतुमेस

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दा॥२१॥ याशरत्कुंदगौरीगदेहेन्दुमलतेजसा। सरस्वती शिवेभक्त्या शांति
माशुकमेतु मे॥२२॥ या च चामीकरछाया सरोजकरपल्लवा शिवभ
क्त्या तु श्री देवी श्रीमद्भूतिं ददातु मे॥२३॥ या चारुणाम्बुरवचंडेरणविचित्रकुसु
मोज्वला। सया देवी शिवे भक्त्या सर्वकामं ददातु मे॥२४॥ या च रक्ताम्बु वि
चित्रेणभास्करोज्वलतेजसा। रुद्र पूजापराया च करोतु विजयं मम॥२५
सिंदूरागरक्तेनवर्णोनायतलोचनः॥ सहस्रकिरणः श्रीमान् सप्तस
प्तिकवाहकः॥ २६॥ गभस्तिमाली भगवान् शिवपादार्चनेरतः॥ करो

Jayatu Sanskritam, Kathmandu, Nepal

तु मे महाशांतिं ग्रहपीडापहारिणीम् ॥१७॥ जगदाप्यायनकरो मृताधार
स्तु शीतल ॥ सोमः सौम्येन भावेन ग्रहपीडां व्यपोहतु ॥१८॥ पद्मरागनि
भांगेन देहेन पिंङ्गलोचन ॥ अंगारकस्तु मे नित्यं ग्रहपीडां व्यपोहतु ॥१९
॥ कुंकुमच्छविदेहेन चापोयतकरः सदा ॥ शिवभक्तो बुधः श्रीमान् ग्रह
पीडां व्यपोहतु ॥२०॥ धातुचामीकरच्छायः सर्वज्ञानकृतालय ॥ बृहस्प
तिः सदा कालमीशानार्चनतत्परः ॥२१॥ सोपि मे शांतचित्तेन परमेण
समाहित ॥ ग्रहपीडां विनिर्जित्य करोतु विजयं सदा ॥२२॥ हिमकुंदेंदु

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ल्याभः सुरैदैत्येंद्रपूजित ॥ शुक्रः शिवार्चनरतो ग्रहपीडां व्यपोहतु ॥ ३३ ॥
भिन्नांजनचयच्छायः सरक्तनयनद्युति ॥ शनैश्चरः शिवेभक्तो ग्रहपी
डां व्यपोहतु ॥ ३४ ॥ नीलांजननिभः श्रीमान् सैंहिकेयो महाबल ॥ शिव
पूजापरो राहुर्ग्रहपीडां व्यपोहतु ॥ ३५ ॥ धूम्राकारो ग्रहः केतुरैशान्यां दि
शि संस्थित ॥ वर्तुलानीव विस्तीर्णलोचनैश्च शुभाषण ॥ ३६ ॥ पलालधू
मसंकाशो ग्रहपीडापहारकः ॥ घोरदंष्ट्राकरालश्च करोतु विजयं मम ॥
३७ ॥ खेचरखेटकहस्तश्च वरेण्यो वरदः शुभ ॥ शिवभक्त्याग्रजन्माय

Jayatu Sanskritam, Kathmandu, Nepal

जन्मात्रहपीडांव्यपोहतु ॥ ७७ ॥ एतेग्रहामहात्मानोमहेशार्चनभाविता
ः ॥ शांतिंकुर्वंतुमेहृष्टाः सदाकालंहितैषिणः ॥ ७८ ॥ सुखेयस्यस्थितानो
नृत्युर्विष्टिर्नाममहाबला ॥ सन्मुखेविघ्नकारीचपृष्ठेचविजयंकरी ॥ ७९
तृतीयासप्तमीचैवदशमीतुचतुर्दशी ॥ चतुर्थीचाष्टमीचैवएकादशीतु
पूर्णिमा ॥ ८१ ॥ एतेषुविघ्नपातेषुकृत्स्नेषुक्लेशसमावहा ॥ कुर्वंतुमेल[illegible]
वराः शांतिंचपरमेप्सिताम् ॥ ८२ ॥ अमावास्यामहापुण्यापितृदेवसम
न्विता ॥ ८२ ॥ शांतिंचपरमांप्राप्यो शिवस्यपरमात्मन ॥ ८३ ॥ शिवते

॥श्रो या॥ नः समाप्रुक्ता करोतु मम शांतिकम्॥ प्रतिपच्च महाभागा द्वितीया च म
॥१४॥ नोहरा॥ ४४॥ तृतिया चा तिथिः श्रीमां चतुर्थी च मेयशा॥ पंचमी नाम
शांतात्मा षष्ठा चा तिथिरुत्तमा॥ ४५॥ सप्तमीतु तिथिः पुण्या अष्टमी
च महाबला॥ तिथिः शुक्लभृतश्चै पापापहा परमास्मृता॥ ४६॥ नव
मा तिथिरन्युग्रा दुर्गायाः परिकीर्त्तिता॥ दशमी शोभना चैव तिथिरेका
दशी तथा॥ ४७॥ द्वादशी चैव शांतात्मा तथा तिथिस्त्रयोदशी॥ चतुर्दशी ॥राम॥
महावीर्याः तिथिः शंकरजात्मजा॥ ४८॥ पूर्णिमा परिपूर्णात्मा तिथि ॥१४॥

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वेसततोज्वला॥ सततंचशुभात्मानस्तिथयश्चक्रमेणतु॥ ४९॥ प
क्षद्वयेसदाह्येतेचंद्रगत्यानुगामिनः॥ शांतिंकुर्वंतुमेनित्यंशिवाज्ञा
नुविधायिनः॥ ५०॥ विष्कंभःप्रीतिरायुष्मान्सौभाग्यःशोभनस्तथा
॥ अतिगंडःसुकर्माचधृतिःशूलस्तथैवच॥ ५१॥ गंडोवृद्धिर्ध्रुवश्चै
वव्याघातोहर्षणस्तथा॥ वज्रःसिद्धिर्व्यतीपातोवरीयान्परिघःशि
वः॥ ५२॥ सिद्धिःसाध्यःशुभःशुक्लःब्रह्मैंद्रोथवैधृतिः॥ चंद्रस्यभा
नोश्चोत्पन्नायोगाश्चैतेमहाबलाः॥ ५३॥ शिवभक्तिपराःसर्वेशिवाज्ञ

Jayatu Sanskritam, Kathmandu, Nepal

॥ शां या ॥ नुविधायिना ॥ शांतिं कुर्वंतु मे नित्यं तथा कलिविघ्ननाशनम् ॥५४॥ कृ
॥७५॥ त्तिका परमा देवी रोहिणी रुचिरानना ॥ श्रीमन्मृगशिरा भद्रा आर्द्रा च
परमोज्वला ॥५५॥ पुनर्वसुस्तथा पुष्य आश्लेषाथ महाबला ॥ नक्ष
त्रमातरो ह्येताः प्रभामलविभूषिता ॥५६॥ महादेवार्चने शक्ता महा
देवानुभाविता ॥ पूर्वभागे स्थिता ह्येताः शांतिं कुर्वंतु मे सदा ॥५७॥ म
घा सर्वगुणोपेता पूर्वा चैव तु फाल्गुनी ॥ उत्तरा फाल्गुनी श्रेष्ठा हस्ता चि ॥ग म॥
त्रा तथोत्तमा ॥ ५८॥ स्वाति विशाखा वरदा दक्षिणस्थानसंस्थिताः ॥७५॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अर्चयंतिसदाकालं देवत्रिभुवनेश्वरम् ॥५९॥ नक्षत्रमानरोहेना
स्तेजसा परिभूषिता ॥ ममापिशांतिकंनित्यं कुर्वंतुशिवचोदिता ॥६०
॥ अनुराधातथाज्येष्ठा मूलमृद्धिबलान्वितम् ॥ पूर्वाषाढामहावी
र्याआषाढाचोत्तराशुभा ॥६१॥ अभिजिन्नामनक्षत्रंश्रवणापरमोज्ज्व
ला ॥ एताः पश्चिमतोरात्रा राजंतेराजमूर्तयः ॥६२॥ ईशानंपूजयं
त्येताः सदाकालंशुभाविताः ॥ ममशांतिंप्रकुर्वंतुविभूतिभिः समन्वि
ताम् ॥६३॥ धनेष्ठाशतभिषाचैव पूर्वभाद्रपदास्तथा ॥ उत्तराभाद्र

Jayatu Sanskritam, Kathmandu, Nepal

॥शा प॥
॥ १६॥

रेवत्यावश्विनीचमहर्द्धिका॥९४॥भरणीचमहावीर्य्यानित्यउत्तरतः
स्थिताः॥शिवार्चनपरानित्यंशिवध्यानैकमानसाः॥९५॥शांतिंकुर्वंतुमे
नित्यंसर्वकालप्रमोदया म्॥मेषोराशिमुखः सिंहोधनुर्द्दीप्तिमतांवर॥
९६॥पूर्वभागेस्थिताएतेशिवपूजापरायणाः॥शांतिंकुर्वंतुमेनित्यंशिव
भक्तिसमन्विताः॥९७॥वृषश्चकन्यादेवीचमकरश्चातिबुद्धिमान्॥एते
दक्षिणभागेतुपूजयन्तीसदाशिवम्॥९८॥भक्त्यापरमयानित्यंशांतिं
कुर्वंतुमेसदा॥मिथुनश्चतुलाकुंभःपश्चिमेनव्यवस्थिताः॥९९॥शिवपाद

॥एम॥
॥१६॥

र्वेनपराः क्षेमंकुर्वंतुमेसदा ॥ कर्कयोवृश्चिकोमीनएतेसुनरतःस्थिता ॥
७० ॥ पूजयंतिसदाकालंदेवंभुवननायकम ॥ शांतिकुर्वंतुमेनित्यंशि
वाज्ञानुविधायिनः ॥ ७१ ॥ ववश्चबालवश्चैवकौलवस्तैत्तिकस्तथा
॥ गरोवणिकतथाविष्टिश्चतुष्पाच्छकुनिस्तथा ॥ ७२ ॥ नागःकिं
स्तुघ्नइत्येवंकरणाःशिवभाविता ॥ सर्वेसुप्रीतमनसःशांतिंकुर्वंतु
मेसदा ॥ ७३ ॥ जन्मसंपद्विपत्क्षेमंप्रत्यरिस्साधकोवध ॥ मैत्रंच
परमंमैत्रंनवैतेतारकागणा ॥ ७४ ॥ शिवभक्तामहात्मानःकुर्वंतु

॥शा॰ प॥ ममशांतिकम्॥ऋषयःसप्तविख्याताध्रुवांताःपरमोज्वला॥१५॥
॥१३॥ शिवप्रसादसंपन्नाःशांतिंकुर्वंतुमेसदा॥काश्यपोगालवोगार्ग्योवि
श्वामित्रोमहामुनि॥१६॥मनुर्दक्षोवशिष्ठोथमृकंडःपुलहःक्रतु
॥असितोवालखिल्याश्चदुर्वासापिप्पलादय॥१७॥ऋचीकोभर
तोगस्त्यःपराशरोविभांडक॥मातंगोजैमिनिर्व्यासोदेवलोदर्भलो
मक॥१८॥मांडव्यश्चदधीचिश्चमार्कंडेयोथगौतम॥नारदोभृगु ॥एम॥
रात्रेयोभारद्वाजोंगिरामुनिः॥१९॥वाल्मीकःकौशिकःकण्वःशा ॥७॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कल्पोथपुनर्वसु ॥ शालंकायनइत्याद्याश्चषयोथमहाधना ॥ ८० ॥ शि
वध्यानार्चनोद्युक्ताः शांतिंकुर्वंतु मे सदा ॥ ऋषिपत्न्यो महापुण्यास्त
थाऋषिकुमारका ॥ ८१ ॥ शिवार्चनपरानित्यंशांतिंकुर्वंतुमेसदा ॥
सिद्धाः संसिद्धतपसो गणाविद्याधरास्तथा ॥ ८२ ॥ महात्मानो महोत्सा
हा गरुडाश्च महर्द्धिका ॥ महेश्वरपरास्तेमहेशपादपूजका ॥ ८३ ॥
सिद्धिमाशुप्रयच्छंतुआशीर्वादपरायणा ॥ नमुचिर्दैत्यराजेंद्रः शो
णकर्णोमहाबल ॥ ८४ ॥ महानादोथविख्यातोदैत्यः परमवीर्यवा

Jayatu Sanskritam, Kathmandu, Nepal

॥ सा॰ य ॥ न्म हाटकेश्वरदेवस्य नित्यं पूजापरायणाः ॥ ८५ ॥ बलवीर्यं च मे नित्यं प्र
॥ १७ ॥ यच्छन्तु महर्द्धिकाः ॥ महारंभो हयग्रीवः प्रह्रादो वक्रहारकः ॥ ८६ ॥ नार
कोपि मुख्यो दैत्यः कालनेमिर्महोत्कट ॥ एते दैत्या महात्मानः शिवस
द्भावभाविनाः ॥ ८७ ॥ पुष्टिं बलं तथा वीर्यं प्रयच्छन्तु सुखोदयम् ॥ विरो
चनो हिरण्याक्षः सुपर्वा चण्डलोमकः ॥ ८८ ॥ मुचुकुन्दः सुजम्भश्च दै
त्यौ रैवतकस्तथा ॥ भावेन च परेणाथ पूजन्ते सर्वदा शिवम् ॥ ८९ ॥ ॥ गम ॥
सततं च शुभान्मानाः पुष्टिं कुर्वन्तु मे सदा ॥ दैत्यपत्न्यो महाभागा दै ॥ १७ ॥

स्थानां कन्यकाः शुभा ।।८०।। कुमार्यश्चैव देव्यानां शांतिं कुर्वंतु मे सदा ।।
आरक्तेन शरीरेण रक्तांनायतलोचन ।।८१।। अनंतो नागराजेंद्रः शिवप
दार्चने रत ।। महापापविषं हत्वा शांतिमाशु करोतु मे ।।८२।। शुभ्रेनेन
तु देहेन श्वेतोत्पलशेखर ।। चारुभोगकृताटोपश्चारुहारविभूषण
।।८३।। वासुकिर्नागराजेंद्रो रुद्रपूजापरो महान् ।। महापापविषं हत्वा
शांतिमाशु करोतु मे ।।८४।। अतिपीतेन देहेन विस्फुरंभोगसंपदा ।। तेजसा
चातिदीप्तेन कृतस्वस्तिकलांछन ।।८५।। नागराट् तक्षकः श्रीमान्न

CC-0. Digitized by eGangotri and MIDF- Delhi

॥श्रा ष॥ गकोघासमन्वित॥ करोतु मे महाशांतिं सर्वदोषविशापहम्॥९६॥अति
॥१९॥ कालेनवर्णेनस्फुटोविकटमस्तका॥ कंठरेखात्रयोपेतोघोरदंष्ट्रायुधोद्य
त॥९७॥कर्कोटकोमहानागोविषदर्पबलान्वितः॥विषशस्त्राग्निसं
तापंहत्वाशांतिंकरोतु मे॥ ९८॥पद्मवर्णेनदेहेनचारुपद्मायतेक्षणः
पंचविंद्रकृताभासोग्रीवायांशुभलक्षणः॥९९॥ख्यातःपद्मोमहा
नागोहरपादार्चनेरत॥ करोतु मे महाशांतिं महापापविषक्षयं॥१०० ॥ए मा॥
॥पुंडरीकनिभेनापिदेहेनामिततेजसा॥शंखभूलावुकृचिरैर्भूषि ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तोमूर्द्धि सर्वदा ॥ १ ॥ महापद्मोमहानागोनित्यंपशुपतेर्नत ॥ विनिष्कृष्य
विषंघोरं शांतिमाशुकरोतु मे ॥ २ ॥ श्यामेनदेहभारेणश्रीमत्कमललो
चन ॥ विषदर्प्पबलोन्मत्तोग्रीवायामेकरेखया ॥ ३ ॥ शंखपालः श्रि
यादीप्तः शिवपादाब्जपूजक ॥ महाविषंमहापापंहत्वाशांतिंकरोतु
मे ॥ ४ ॥ अतिघोरेणदेहेनचंडार्कक्षतमस्तक ॥ दीप्तभोगकृताटोपःश्रु
भलासिरालसित ॥ ५ ॥ कुलिशोनागराजेशोनित्यंहरपरायणः ॥
अपहन्यविषंघोरंकरोतु मम शांतिकम् ॥ ६ ॥ अंतरिक्षेचयेनागायेना

Jayatu Sanskritam, Kathmandu, Nepal

॥शा या॥ गास्वर्गसंस्थिताः॥ गिरिकंदरदुर्गेषुयेनागाभुविसंस्थिताः॥७॥पातालेये
॥२७॥ स्थितानागाःसर्वेप्यत्रसमाहिता॥रुद्रपादार्चनेशक्ताःकुर्वंतुममशां
तिकम्॥८॥ नागिन्योनागकन्याश्चतथानागकुमारका॥ शिवभक्ताःसु
मनसःशांतिंकुर्वंतुमेसदा॥९॥यइदंनागसंस्थानंकीर्त्तयेच्छृणुयाद
पि॥नतस्यसर्पाहिंसंतिनविषंक्रमतेसदा॥१०॥ गंगापुण्यामहादेवी
यमुनानर्मदानदी॥गोमतीचापिकावेरीवरुणादेविकातथा॥११॥सर्व ॥राम॥
भूतमतिंदेवंपरमेशंमहेश्वरम्॥ पूजयंतिमहानघःशिवसद्भावभावि ॥२०॥

CC-0. Digitized by eGangotri and MIDF- Delhi

ता॥१२॥शांतिंकुर्वंतुमेहृष्टास्तथापापपरिक्षयम्। सिद्धिमाप्नुप्रयच्छं
तिसर्वविघ्नविवर्जिताम्॥१३॥ चंद्रभागामहापुण्यानदीगोदावरीशु
भा॥ सरयूगंडकीश्रेष्ठाकौशिकीचसरस्वती॥१४॥ एतानद्योमहा
भागाःशिवपादाब्जपूजकाः॥शांतिंकुर्वंतुमेप्रीताशिवध्यानैकमानसाः
॥१५॥निरंजनानामनदीशोणश्चापिमहानदः॥मंदाकिनीचपरमातथा
सन्निहिताशुभा॥१६॥सिप्राविपाशाचनदीलौहित्यश्चमहानदः॥महान
दातथावेणातथावैतरणीनदी॥१७॥एताश्चान्याश्चबहवोभाविस्यंत

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रिक्षगाः। रुद्रार्चनपरानघः कुर्वंतु मम शांतिकम्॥ १८॥ महावैश्रवणो
देवो यक्षराजो महर्द्धिकः। यक्षकोटिपरीवारो यक्षसंख्येनसंयुतः॥
१९॥ महाविभवसंपन्नो हरपादार्चने रतः। हरध्यानैकपरमो हरपाद
नतो नमः॥ २०॥ शांतिं करोतु मे श्रीनः पद्मपद्मायतेक्षणः॥ मणिभद्रो म
हायक्षो मणिरत्नविभूषितः॥ २१॥ मनोहरेण हारेण कंठलग्नेन राज
ते॥ यक्षिणी यक्षकन्याभिः परिवारितविग्रहः॥ २२॥ रुद्रार्चनपरो य
क्षः करोतु मम शांतिकं॥ उवीरोनामयक्षेन्द्रो मणिकुंडलभूषितः॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२३ ॥ मनोहरेणहारेण कंठलग्नेन राजते ॥ वहुयक्षसमाकीर्णो यक्षैर्नमित
विग्रह ॥ २४ ॥ शिवपूजापरो भक्तः करोतु मम शांतिकम् ॥ पांचिकोनाम
यक्षेंद्रः कंठिकाकटकोज्वल ॥ २५ ॥ हारेणापि विचित्रेण केयूराभ्यां
विराजते ॥ यक्षसंघैः समायुक्तो यक्षकोटिसमावृतः ॥ २६ ॥ हरार्चनपर
ः श्रीमान् करोतु मम शांतिकम् ॥ श्रीमान् विभांडको यक्षो नानारत्नविभू
षित ॥ २७ ॥ चारुणा कुंडलेनेण कर्णोनित्यं विराजते ॥ यक्षेश्वरो यक्षपति
र्यक्षसेनापतिर्ध्रुव ॥ २८ ॥ हरपादार्चकः श्रीमान्करोतु मम शांतिकम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ धनराज्ञो महातेजा यक्षो यक्षाधिपः प्रभुः॥ २९॥ दिव्यपट्टांशुकछन्नो
मणिकांचनभूषितः॥ चंडसंपन्नपट्टेन देहेनापि विराजते॥ ३०॥ यक्ष
कोटिसहस्रैस्तु परिवारितविग्रहः शिवभक्तः शिवध्याता शिवपूजा
परायणः॥ ३१॥ शिवप्रसादसम्पन्नः करोतु मम शांतिकम्॥ पूर्वभद्रो
महायक्षः सर्वालंकारभूषितः॥ ३२॥ रत्नप्रदीपपट्टेन हेम्नातीव विराज
ते॥ यक्षकोटिसहस्रेण परिवारेण संयुतः॥ ३३॥ रुद्रप्रणामपरमो
रुद्रभक्तिप्रनःपुनः॥ रुद्रार्चनसमायुक्तः करोतु मम शांतिकं॥ ३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विरूपाक्षश्चयक्षेंद्रः श्वेतवासामहाद्युतिः ॥ चारुकांचनवर्णाभिः किं
किणीभिः समन्वितः ॥ ३५ ॥ भूषितश्चसदाकालंवरदानेकतत्परः ॥
रुद्रपूजापरोभक्तः करोतु मम शांतिकम् ॥ अंतरिक्षगतायक्षायेयक्षा
ःस्वर्गवासिनः ॥ गिरिकंदरदुर्गेषुयेयक्षाभूनिवासिनः ॥ अंतरिक्षेचये
यक्षापातालतलवासिनः ॥ नानारूपायुधायक्षानानावेषधरास्तथा
॥ ३७ ॥ शिवभक्ताः शुभमनसः शिवपूजासमुत्सुकाः ॥ शांतिंकुर्वंतुमे
हृष्टाः शांताशांतपरायणाः ॥ यक्षिण्योविविधाकारास्तथायक्षक

Jayatu Sanskritam, Kathmandu, Nepal

॥ शा प ॥
॥ २३ ॥

मारका ॥ यक्षकन्या महाभागाः शिवपादार्चने रताः ॥ ७९ ॥ शांतिं स्वस्त्य
यनं क्षेमं बलं कल्याणमुत्तमम् । सिद्धिं चाभ्युदयं छंतु नित्यमेव समाहि
ताः ॥ ८० ॥ मेरुमंदरकैलाशमलयो गंधमादनः ॥ श्रीपर्वतो महेंद्रश्च हे
मकूटस्तथैव च ॥ ८१ ॥ पर्वतास्सर्वतस्सर्वे पर्वताश्च महर्द्धिकाः । शिवभ
क्ताः सदाकालं क्षेमं कुर्वंतु मे सदा ॥ ८२ ॥ जंबूद्वीपः प्लक्षद्वीपः शाल्मलि
कशद्वीपकः ॥ क्रौंचद्वीपः शाकद्वीपः गोमेदो द्वीपको महान् । पुष्करश्च ॥ राम ॥
महाद्वीपस्ते द्वीपा महर्द्धिकाः ॥ रुद्रभक्तिरताः सर्वे शांतिं कुर्वंतु मे सदा ॥ ॥ २३ ॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

४४ ॥ सारोदकन्तु क्षीरोदे दध्नो घृतोदमेव च ॥ सुरोदश्चेक्षुरसोदकश्च इक्षुस्वा
दुस्तथैव च ॥ ४५ ॥ सप्तसमुद्रनामानः कुर्वन्तु मम शांतिकम् ॥ सागराः स
र्वतस्सर्वे सागराः सर्वतस्थिता ॥ ४६ ॥ रुद्रपूजापरा नित्यं कुर्वन्तु मम शांति
कम् ॥ राक्षसाः सर्वतः सर्वे राक्षसा घोररूपिणः ॥ ४७ ॥ राक्षसा ये महावी
र्या राक्षसाश्च महाबला ॥ स्थलस्था राक्षसा ये तु अंतरिक्षे तु राक्षसा ॥ ४८
॥ पाताले भूतले ये च नित्यं रुद्रपरायणाः ॥ शांतिं कुर्वन्तु मे नित्यं सततं
शिवभाविता ॥ ४९ ॥ भैरवं यस्य रूपं तु भस्मावगुंठितम् ॥ तेजस्कातस्य

॥शा य॥ देवस्य शांतिं कुर्वंतु मे सदा॥५०॥ नित्यमुज्वलवेषेण योगिन्योथ महा
॥२५॥ बला॥ रूपिण्यो विविधाकारा डाकिन्यश्च महर्द्धिका॥५१॥ रुद्रग्रा
मनिरताः रुद्रपूजापरायणा॥ रुद्रैकाहितचेतस्काः कुर्वंतु मम शांति
कं सदा॥५२॥ अंतरिक्षगता याश्च डाकिन्यः स्वर्गसंस्थिताः॥ पाताले या
श्च डाकिन्यो गिरिदुर्गगुहास्थिताः॥५३॥ तृतीयं लोचनं यस्या त्रिशूलं
भस्म भास्वरम्॥ तेजसा तस्य देवस्य शांतिं कुर्वंतु मे सदा॥५४॥ सर्वे ॥राम॥
भूता महारूपाः सर्वभूता महोज्वला॥ सर्वभूता महासौम्याः सर्वे भू ॥२६॥

CC-0. Digitized by eGangotri and MIDF- Delhi

तामहासौम्याः सर्वे भूता मनोजवाः ॥५१॥ अंतरिक्षे च ये भूता ये भूता दिवि संस्थिता ॥ पाताले भूतले ये च भूता भूतिविधायकाः ॥५२॥ स्वर्गांगविमलं यस्य त्रिशूलं भस्म भास्करम् ॥ तेजसा तस्य देवस्य शांतिं कुर्वंतु मे सदा ॥५३॥ प्रेताः प्रेतगणाः सर्वे ये प्रेताः सर्वतोमुखाः ॥ अंतरीक्षाश्च ये प्रेता ये प्रेता रुधिराशनाः ॥५४॥ अंतरिक्षे च ये प्रेता ये प्रेता स्वर्गवासिनः ॥ पाताले भूतले प्रेता ये प्रेता कामरूपिणः ॥५५॥ श्मसाने निनयो यस्य वृषभो यस्य वाहन् ॥ तेजसा तस्य देवस्य शांतिं कुर्वंतु मे सदा ॥५६॥ ये

Jayatu Sanskritam, Kathmandu, Nepal

॥ग्रा या॥ पिशाचामहावीर्या ऋक्षिमंतोमहाबला॥ नानारूपधराः सर्वेसर्वेचगुणा
॥२५॥ विस्मृता॥६२॥ अंतरिक्षेपिशाचायेस्वर्गेयेचपिशाचका॥ भूपातालेपि
शाचायेबहुरूपामनोजवाः॥६३॥ वज्राङ्कुमस्तकेयस्यगंगायेनजटा
धृता तेजस्मातस्यदेवस्यशांतिंकुर्वंतुमेसदा॥६४॥ अपस्मारग्रहाःस
र्वेसर्वेचापिज्वरग्रहाः॥ गर्भबालग्रहायेतुनानारोगग्रहाश्चये॥६५॥ अं
तरिक्षेग्रहायेतुस्वर्गेयेतुग्रहोत्तमाः॥ भूपातालेग्रहायेतुयेग्रहाःस ॥राम॥
र्वतोदिशः॥६६॥ कंठेयस्यमहानीलंभूषणांयस्यपन्नग॥ तेजस्मात ॥२८॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यदेवस्यशांतिंकुर्वंतुमेसदा॥६६॥इतिदेवादयःसर्वेशिवाज्ञानुविधायि
नः॥कुर्वंतुजगतःशांतिंशिवभक्तेषुसर्वदा॥६७॥जयात्मयोगसंस्था
यजयपसंस्थुकृचेतस॥जयदानैकभूतायजययेशायनमोस्तुते॥६८॥
जयोत्तमायदेवायजयकल्याणकारिणे॥जयप्रकारदेहायजययज्ञ
प्यायतेनमः॥६९॥जयलक्ष्मीविधानायजयकांतिविधायिने॥जय
वाक्यविष्णुरूपायअजितायनमोनमः॥७०॥जयज्ञानविष्णुरूपायसर्व
व्यापिनमोस्तुते॥जयसर्वार्थविष्णुरूपायचाष्टमूर्तेनमोनमः॥७१॥जय

Jayatu Sanskritam, Kathmandu, Nepal

षिश्रूलहस्तायजयखड्गधारिणे॥जयनिर्जितलोकायजयरूपाय
तेनमः॥१२॥जयकांताङ्गदेहायजयचंशार्ङ्गधारिणे।जयदेवातिदे
वायजयरुद्रायतेनमः॥१३॥जयत्रिभुवनेशायजयविख्यातकर्मणे
॥जयाधारायसर्वायजयकर्त्रेनमोनमः॥१४॥जयमोक्षप्रदानायसृ
ष्टिसंहारकारिणे॥ब्रह्मविष्णुस्वरूपायशिवशांतनमोस्तुते॥१५॥इत्येवं
शांतिकाध्यायंयःपठेच्छृणुयादपि॥सविधूयाशुपापानिब्रह्मलोकेम
हीयते॥१६॥कन्यार्थीलभतेकन्यांजयकामोजयंलभेत्॥अर्थकामो

CC-0. Digitized by eGangotri and MIDF- Delhi
Jayatu Sanskritam, Kathmandu, Nepal

लभेत्सर्वान्पुत्रकामःसुतान्बहून् ॥ ७७ ॥ विद्यार्थीलभतेविद्यांयोगार्थी
योगमाप्नुयात ॥ यान्यान्प्रार्थयतेकामान्मानवः श्रवणादिह ॥ ७८ ॥ त
त्सर्वंशीघ्रमाप्नोतिदेवानांचप्रियोभवेत् ॥ शांत्यध्यायंपठन्यस्तुसं
ग्रामंप्रविशेन्नरः ॥ ७९ ॥ सनिर्जित्याहवेशत्रून्कल्याणैःपरिपूर्यते ॥ अक्ष
यंमोक्षन्तेकालमतिरक्षतशासन ॥ ८० ॥ व्याधिभिर्नाभिभूयेतपुत्रपौत्र
प्रतिष्ठितः ॥ पठ्यमानमिदंपुराणंयत्रगृहेषुचपठ्यते ॥ ८१ ॥ नतस्यरोगाबा
धंतेवातपित्तादिसंभवाः ॥ नाकालेमरणंतस्यनसर्पैश्चापिदंश्यते ॥

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ग्रा या॥ ॥८२॥ नविघ्नं मेते रेहे नजन्त्वांधमूकता। नोपसर्गभयंतस्य नोतपात

॥२७॥ स्यभयंभवेत्॥८३॥ नाभिचारकृतैर्दोषैर्लिप्यते लकराचन। यतफलं

सर्वतीर्थानांगंगादीनांविशेषत॥ ८४॥ तत्फलंकोटिगुणितं प्राप्नोतिश्र

वणादिह॥ दशानांराजसूयानांमग्निष्टोमशतस्यच॥ ८५॥ श्रवणात्फ

लमाप्नोतिकोटिकोटिगुणोत्तरम्॥ अवध्यःसर्वदेवानामन्येषांचविशेष

त॥ ८६॥ जीवेद्वर्षशतंसाग्रंसर्वव्याधिविवर्जित॥ गोपृथ्वैवकृतप्रभ ॥एम॥

ब्रह्महागुरुतल्पग॥ ७॥ शरणागतघातीचमित्रविश्वासघातक॥ ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुष्टपापसमाचारैर्मातृहा पितृहा तथा ॥ ८५ ॥ श्रवणानस्यभावेनमु-
च्यते सर्वपातकैः ॥ शांत्यध्यायमिदंपुण्यंनदेयंयस्यकस्यचित्॥
शिवभक्तायदातव्यंशिवेनकथितंपुरा ॥ ९० ॥ इतिशांतिकाध्यायसमा-
प्त ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal